तेन निर्जा खेरेणुरिव्यस्य वृत्तौ विजयरक्षिते-
नैवास्य ग्रहणात् खेर्गुणः। ध न, विनक्ति
विरक्तौ। विविनचमि दिवः सुरान् इति
पृथक् करोमीत्यर्थः। चौ, वेता। इति दुर्गा-
दासः॥

विचकिलः, पुं, मल्लीप्रभेदः। मदनकन्दकः। इति
मेदिनी। ले,१६४। (यथा, राजेन्द्रकर्णपूरे।७०।
"कुन्दः कन्दलितव्यथं विचकिलः कम्पाकुलं केतकः
सातङ्कं मदनः सदैन्यमलसं सुक्तोऽतिसुक्तद्रुमः॥")

विचक्षणः, पुं, (विशेषेण चष्टे धर्म्मादिमुपदि-
शतीति। वि+चक्ष+"अनुदात्तेतश्च हलादेः।"
३।२।१४९। इति कर्त्तरि युच्।) पण्डितः।
इत्यमरः॥ (यथा रघुवंशे।५।१९।
"ततो यथावद्विहिताध्वराय
तस्मै स्मयावेशविवर्ज्जिताय।
वर्णाश्रमाणां गुरवे सवर्णी
विचक्षणः प्रस्तुतमाचचक्षे॥")
निपुणे, त्रि। इति राजनिर्घण्टः॥ (यथा भाग-
वते।१।५।१६।
"विचक्षणोऽस्यार्हति वेदितुं विभो-
रनन्तपारस्य निवृत्तितः सुखम्॥"
नानार्थदर्शी। यथा ऋग्वेदे।४।५३।२
"विचक्षणः प्रथयन्नापृणन्नुर्व्वजीजनत् सविता
सुम्नमुक्थ्यम्।"
"विचक्षणः विविधं द्रष्टा।" इति तद्भाष्ये
सायणः॥)

विचक्षणा, स्त्री, नागदन्ती। इति राजनिर्घण्टः॥

विचक्षुः, [स्] त्रि, (विगतं प्रत्यक्षितेऽपि वस्तुनि
अपगतं चक्षुर्यस्य।) विमनाः। इति त्रिकाण्ड-
शेषः॥ (विगते नष्टे चक्षुषी यस्य।) विगतचक्षुषि,
त्रि। (यथा, महाभारते।१२।६५।३४।
"अन्तरा विलयं यान्ति यथा पथि विच-
क्षुषः॥"
विशिष्टे चक्षुषी यस्य सः। इक्ष्वाकुवंशीयः कश्चिद्
योद्धा। यथा, हरिवंशे।१४१।६।
"शतवर्म्मा सुदंष्ट्रश्च विचक्षुररिमर्द्दनः॥")

विचयनं, क्ली, (विशेषेण चयनम्।) मार्गणम्।
इत्यमरः॥

विचर्च्चिका, स्त्री, (विशेषेण चर्च्चते पाणिपादस्य
त्वक् विदार्य्यते अनया इति। चर्च्च तर्जने+
"रोगाख्यायां ण्वुल् बहुलम्।"३।३।१०८। इति
ण्वुल्। टापि अत इत्वम्।) रोगविशेषः।
विकच इति भाषा। तत्पर्य्यायः। कच्छूः २ पाम
३ पामा ४। इत्यमरः॥ अपि च।
"कच्छुः कच्छूः पाम पामा पादरोगे विच-
र्च्चिका।"
इति शब्दरत्नावली॥*॥
तदौषधम् यथा,—
"करवीरं भृङ्गराजं लवणं कुटकण्टकम्।
चतुर्गुणेन मूत्रेण पचेत्तैलं हरेत्ततः।
पामां विचर्च्चिकां कुष्ठमभ्यङ्गाद्धि व्रणानि वै॥"
इति गारुडे २०७ अध्यायः॥*॥
अन्यच्च।
"मरीचं त्रिवृतं कुष्ठं हरितालं मनःशिला।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम्॥
विशाला करवीरञ्च अर्कक्षीरं सकृत् फलम्।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत्॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत्।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत्॥
पामा विचर्च्चिका चैव दद्रुविस्फोटकानि च।
अभ्यङ्गेन प्रशाम्यन्ति कोमलत्वञ्च जायते॥
प्रसृतान्यपि श्वित्राणि तैलेनानेन म्रक्षयेत्।
चिरोत्थितमपि श्वित्रं विवर्णं तत्क्षणाद्भवेत्॥"
इति गारुडे १९८ अध्यायः॥*॥
क्षुद्रकुष्ठविशेषः। यथा।
"एकं कुष्ठं स्मृतं पूर्व्वं गजचर्म्म ततः स्मृतम्।
ततश्चर्म्मदलं प्रोक्तं ततश्चापि विचर्च्चिका॥
विपादिकाभिधा सैव पामा कच्छूस्ततः परा।
ततो दद्रुश्च विस्फोटः किटिमश्च ततः परम्।
ततश्चालसकं प्रोक्तं शतारुश्च ततः परम्।
क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः॥
सकण्डूः पिडका श्यावा बहुस्रावा विच-
र्च्चिका॥"
पिड़का क्षुद्रपिड़का।
"दाल्यते त्वक् खरा रूक्षा पाण्योर्य्या विच-
र्च्चिका।
पादे विपादिका ज्ञेया स्थानभेदाद्विचर्च्चिका॥"
दाल्यते विदार्य्यते। केचिद्विचर्च्चिकातो विपा-
दिकां विभिन्नमाहुः। इति भावप्रकाशः॥
(सा च महापातकशेषभोगचिह्नं वैदिककर्म्म-
प्रतिबन्धिका च। यथा, शुद्धितत्त्वधृतभविष्य-
पुराणीयमध्यतन्त्रे षष्ठाध्याये।
"ब्रह्म कुष्ठगतं विप्र उत्तरोत्तरतो गुरुम्।
विचर्च्चिका तु दुश्चर्म्मा चर्व्वरीयस्तृतीयकः॥
विकर्च्चैशगतास्त्रौ च ज्ञायन्ते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत् सर्व्वगात्रेषु गण्डे भाले तथानसि।
स्त्रते च प्रोषयेत् तीर्थे अथवा तत्स्थलके॥"
कदाचित् अभिजन्यभूमिकस्यापि विचर्च्चिका
उत्पद्यते। यथा वृहत्संहितायाम्।३२।१४।
"आर्म्येऽम्बुदनाशः
सलिलाशयसङ्क्षयो नृपतिवैरम्।
दद्रुविचर्च्चिकाज्वर-
विसर्पिकाः पाण्डुरोगश्च॥")

विचलः, त्रि, अस्थिरः। विपूर्व्वचलधातोरल्-
प्रत्ययेन निष्पन्नः॥

विचलितः, त्रि, पतितः। स्खलितः। विपूर्व्वचल-
धातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, मनुः।
७।२८।
"दण्डो हि सुमहत्तेजो दुर्द्धरश्चाकृतात्मभिः।
धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम्॥")

विचारः, पुं, (विशेषेण चरणं पदार्थादिनिर्णये
ज्ञानमिति। वि+चर+घञ्।) तत्त्वनिर्णयः।
इति व्यवहारतत्त्वम्॥ सन्दिग्धे वस्तुनि प्रमा-
णेन तत्त्वपरीक्षा। इति गोयीचन्द्रः। प्रमाणै-
रर्थपरीक्षणं विमर्शमात्रमिति केचित्। इति
भरतः॥ तत्पर्य्यायः। तर्कः २ निर्णयः ३
गुञ्जा ४ चर्चा ५। इति त्रिकाण्डशेषः॥
संख्या ६ विचारणा ७। इत्यमरः॥ चर्चनम् ८
संख्यानम् ९। इति तट्टीका॥ विचारणम् १०
वितर्कः ११ ऊहः १२ वहः १३ जहः १४
वितर्कणम् १५। इति शब्दरत्नावली॥ प्रणि-
धानम् १६ समाधानम् १७। इति जटाधरः॥
(यथा, कथासरित्सागरे।३६।८८।
"न चैवं क्षमते नारी विचारं मारमोहिता।
यदियं क्रमते राज्ञी तव कार्य्यं विपन्नतम्॥"
नाट्योक्तलक्षणविशेषः। तल्लक्षणं यथा,साहित्य
दर्पणे।६।४४७।
"विचारो युक्तवाक्यैर्यदप्रत्यक्षार्थसाधनम्॥")

विचारणं, क्ली, (वि+चर+णिच्+ल्युट्।)
विचारः। इति शब्दरत्नावली॥ (यथा,
भागवते।१२।१३।१८।
"तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्ममा-
विष्कृतम्।
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्ये-
न्नरः॥"
"एकस्मिन् धर्म्मिणि विरुद्धनानार्थविमर्शो
विचारणम्। स च संशयस्त्रिधा स्यात् एको
विशेषादर्शने समानधर्म्मदर्शनात्। अहिर्व्वा
रज्जुर्व्वा। द्वितीयो विशेषादर्शनमात्रे। अत्र
शब्दो नित्योऽनित्यो वा। तृतीयोऽसाधारण-
धर्म्मेण यथा भूर्नित्या अनित्या वा। अत्र गन्धो-
ऽसाधारणधर्म्मः विशेषमपश्यन् संशेते गन्धाधि-
करणं नित्यं अनित्यं वेति दिक्।" इति।
"विचारणे पूर्व्वस्य।" इति श्रीपतिदत्तकलाप-
तन्त्रपरिशिष्टे गोपीनाथतर्काचार्य्यः॥)

विचारणा, स्त्री, (वि+चर+णिच्+युच्।
टाप्।) विचारः। इत्यमरः॥ (यथा, देवी-
भागवते।१।१८।४२।
"जीवो ब्रह्म सदैवाहं नात्र कार्य्या विचा-
रणा।
भेदबुद्धिस्तु संसारे वर्त्तमाना प्रवर्त्तते॥")
मीमांसाशास्त्रम्। इति हेमचन्द्रः॥

विचारणीयं,त्रि, विचार्य्यम्। विपूर्व्वण्यन्त(णिजन्त)
चरधातोरनीयप्रत्ययेन निष्पन्नम्। क्ली,शास्त्रम्।
इति हेमचन्द्रः॥

विचारितः, त्रि, (विचारः संजातोऽस्य इति
विचार+"तदस्य संजातं तारकादिभ्य इतच्।"
५।२।३६। इति इतच्।) कृतविचारः।
तत्पर्य्यायः। विन्नः २ वित्तः ३। इत्यमरः॥
(यथा, मनौ।११।२८।
"आपत्कल्पेन यो धर्म्मं कुरुतेऽनापदि द्विजः।
स नाप्नोति फलं तस्य परत्रेति विचारितम्॥")

विचार्य्यं, त्रि, विचारितव्यम्। विचारणीयम्।
विपूर्व्वचरधातोर्ण्यन्तात् यप्रत्ययेन निष्पन्नम्॥
(यथा, मार्कण्डेये।६६।१८।